कुष्णन्तस्माद्द्वेवानां यज्ञः” इति शत० ब्रा० ११,२,७, २१,२५, “उलूकषो उल्का” भा० । “अभिचरन्ननुयाजानुमन्त्रणमशन्यम् जहि ह्रादुन्यन्तं जहि उल्कुष्यन्तं जहि” कात्या० ३,५,१४।

**उल्ब** न० उला दाहेन बणति वण–बा० ड । जरायौ गर्भवेष्टनचर्म्मणि । “यथोल्बेनावृतोगर्भस्तथा तेनेदमावृतम्” गीता । “तस्योत जायमानस्योल्ब आसीद्धिरण्ययः” अथ० ४,२,८, “गर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते”। “तस्माद्गर्भाः प्रावृता उल्बेन जायन्ते तैत्ति० सं० “उल्बे गर्भवेष्टने तिष्ठति” यजु० ५,३,४,१८, “गर्भोजरायुणावृतः उल्बं जहाति जन्मना” १६,७६,

**उल्बण** त्रि० उला बणति अच् । १उत्कटे २प्रकाशान्विते ३नतोन्नते च । “त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः । तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः” रघुः “प्रववर्ष च तत्रैव सहसा तोयमुल्बणम् भा०व०८६अ० ।

**उल्मुक** न०उष–दाहे मुक, षस्य लः। १ज्वलदङ्गारे अमरः । २वृष्णिभेदे“उल्मुकोनिशठश्चैव वीरश्चाङ्गावहस्तथा भा०स० ३३अ० ३अग्न्याधानार्थे ज्वलदङ्गारे च । “अन्वाहार्यपचनादुल्मुकमादायोदङ् परेत्य जुहोति”शत०ब्रा०२,६, २,७ “उद्यत एवैष आग्नोध्रीयोऽग्निर्भवत्यथैत एकैकमेवोल्मुकमादाय यथाधिक्यं विपरायन्ति तैरेव तेषामुल्मुकैः प्रघ्नन्तीति” ४,६,८,७ । उल्मुके भवः यत् । उल्मुखसाध्ये त्रि० । “अथ हैक उल्मुक्येन दहन्ति” शत० ब्रा० १२,५,१,१६ ।

**उल्लङ्घन** न० उद्+लघि–भावे ल्युट् । अतिक्रमे, ऊर्द्धभागगमनादिना अतिक्रमणे (डिङ्गान) । [२उच्चलिते त्रि०।

**उल्लल** त्रि० उत्+लल–अच् । १बहुरोगयुक्ते हारा० ।

**उल्ललित** त्रि० उद्+लल–क्त । १उच्चलिते २तरलिते, ३आन्दोलिते च ।

**उल्लसन** न० उद्+लस–ल्युट् । १उल्लासे हर्षजनकव्यापारे आधारे ल्युट् । संज्ञायां कन् । २रोमाञ्चे हेम० ।

**उल्लसित** त्रि० उद्+लस–क्त । १स्फुरिते २उद्गते ३हृष्टे च ।

**उल्लाघ** त्रि० उद्+लाघ–क्त नि० । १रोगनिर्मुक्ते, २दक्षे, ३शुचौ, च । ४मरिचे पु० ।

**उल्लाप** पु० उद्+लप–घञ् । १काकुवाक्ये, २शोकरोगादिना विकृतस्वरयुक्तवाक्ये ३दुष्टवाक्ये“खलोल्लापाः सोढाः कथमपि तदाराधनपरैः” वारा० । ४ सूचने च ततोऽस्त्यर्थे ठन् । सूचके त्रि० “वाजोल्लापिकधूमाढ्यसङ्घप्राकारतोरणम्” भा० उ०१६२अ० [ख्याने ।

**उल्लापन** न० उद्+लप–णिच्–ल्युट् । स्तुत्यादिना व्या-

**उल्लास** पु० उद्–लस–घञ् । १प्रकाशे, २आह्लादे, “निपतन्ति कन्दलवनोल्लासाः पयोविन्दवः” अमरुशत० । “सौहित्यवचनोल्लाससहासप्रतिभादिकृत्” सा० द० । ग्रन्थस्याध्यायस्थानीये ३परिच्छेदे च यथा काव्यप्रकाशे। ४प्रारम्भे च

**उल्लासिन्** त्रि० उद्+लस–णिनि । १उल्लासयुक्ते प्रभान्विते २आह्लादिनि स्त्रियां ङीप् । “सुमनसामुल्लासिनीमानसे” चन्द्रालोकः ।

**उल्लिखित** त्रि०उद्+लिख–क्त । १उत्कीर्णे २तनूकृते “त्वष्ट्रेव यन्त्रोल्लिखितो विभाति” रघुः । ३उपरि लिखिते । ४चित्रिते ५कर्त्तव्यतया कृतोल्लेखे पदार्थे च ।

**उल्लुञ्चन** न०उद्+लुचि–अपनयने ल्युट् ।१उत्कर्त्तने (उपड़ान) २उन्मूलने च“पादकेशांशुककरोल्लुञ्चने च पणान् दश”या०

**उल्लुण्ठन** न० उद्+लुठि–क्त ना । स्वाभिप्रायापह्नवेन अन्यथाभावप्रकाशने (ठाट्टा) च । उल्लुण्ठाऽप्यत्र स्त्री । “धीराधीरा तु सोल्लुण्ठभाषितैः संवदेदमुम्” यथा “अनलङ्कृतोऽपि सततं हरसि मनोमे यतः प्रसभम् । किं पुनरलङ्कृतस्त्वं सम्प्रति नखरक्षतैस्तस्याः” सा०द० अत्र सपत्नीनखक्षतदर्शनजातेर्ष्यापह्नवेन मनोहर्षजनकत्वोक्तिस्तदभावद्योतनार्था”।

**उल्लू** त्रि० उद्+लू–क्विप् । उत्पाटके

**उल्लेख** पु० उद्+लिख–घञ् । इदं कर्त्तव्यमित्यादिना संकल्पितार्थप्रतिपादकशब्दोच्चारणे “संज्ञाशब्दस्येदमेव प्रयोजनम् यत्तयोल्लेखः” ति०त० । अलङ्कारभेदे पु० स च ३६८पृ०उक्तः । २घर्षणे च । “असकृद्घिषितशस्योल्लेखविषमितशिखरेण” काद० । ३उत्कीर्त्तने च

**उल्लेखन** न०उद्+लिख–ल्युट् । १वमने, २खनने, कर्त्तव्यतया ३संकल्पितार्थकवाक्योच्चारणे “मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः । उल्लेखनमकुर्व्वाणो न तस्य फलभाग् भवेत्”ति०त०ब्र०पु०। “संकल्पेन विना राजन् ! यत्किञ्चित् कुरुते नरः । फलं चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत्”ति०त०ब्र०पुराणाच्च संकल्पवाक्ये मासादीनामवश्यं कीर्त्तनीयताऽवगम्यते । “मनसा सङ्कल्पयति वाचाऽभिलपतीत्युक्तेरपि अभिलापस्यावश्यकता । अभिलापवाक्ये च मासादिनिमित्तानामिव आत्मसम्बन्धितेन तत्तत्कर्मादिकस्यापि कीर्त्तनं कर्त्तव्यम्” “प्रत्येकं नि-